ओ३म्

द्वितीय सेमेस्टर, M.A. संस्कृत, P.G. के छात्रों के लिए CC-IX (रूपक | उत्तररामचरितम् | भवभूतिपरिचयः) से सम्बद्ध पाठ्य सामग्री......

पाठनिर्माण कर्ता विद्वान्


DR. C.S.R. Linga Reddy
Assistant Professor
Sanskrit Department
B.N. college, Patna University
Mob. No. 9760525164; 9410773430
Email- csrlr77@gmail.com


पाठस्य नाम

## महाकविर्भवभूतिः

कविकुलगुरोः कालिदासस्य कविताकामिनीस्पर्धायाम् अस्ति चेद् योग्यतासम्पन्नः कविराजः, असौ तु भवभूतिरेव। कारुण्यकविताकामिनीरचनायाम् अपरो वाल्मीकिर्विद्यते कविर्भवभूतिः। शोकः श्लोकत्वमागतः इतिवत् कारुण्यं भवभूतिरेव तनुते इति प्रसिद्धिरस्ति। अन्येषां नाटककाराणाम् अपेक्षया महकविः भवभूतिः स्वपरिचयमधिकरूपेण विशदीचकार। अयं महाकविः विदर्भेषु भवं पद्मपुरमध्युवास। असौ कृष्णयजुर्वेदतैत्तिरीयशाखाध्यायिनि ब्राह्मणकुले जन्म लेभे। अस्य महाकवेरपरं नाम श्रीकण्ठः इति प्रसिद्धिरस्ति। उदुम्बरः इत्यस्य कवेः उपाधिरस्ति। दीपशिखाकालिदासः, आतपत्रभारविः, घण्टामाघः इति वद् तद्वदितव्यम्। प्रसिद्धस्य दार्शनिकस्य कुमारिलभट्टस्य प्रभाकरभट्ट-मण्डनमिश्रप्रभृतिशिष्यसत्तमेषु महाकविभवभुतिरप्यन्यतमः इति जेगीयते विविधटीकारचनापारङ्गतैः विद्वद्भिः। तत्र आचार्यपादानां कुमारिलभट्टानां सकाशेऽस्य नाम भट्ट-उम्बेकः इति अनेकैः टीकाकृद्भिः साधितम्, स एव भवभूतिरित्यपि प्रतिपादितम्। महाकविभवभूतेः पितामहः भट्टगोपालः पिता नीलकण्ठः माता च जतुकर्णी बभूवुः।

राजतरङ्गिण्याम् उपलब्धश्लोकेनानेन ज्ञायते यत् महाकविभवभूतिः राज्ञः यशोवर्मणः सभापण्डितः इति-

कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः।

जितो यशोवर्मा तद्गुणस्तुतिवन्दिताम् ।। राजतरङ्गिणी-4/134

तिलकमञ्जर्याः रचयिता धनपालः महाकवेर्भवभूतेः काव्य-अधिष्ठात्रीं सरस्वतीं ललितलास्य प्रावीण्यनटीवत् तोलयामास। सत्यमेवेदं यद् भवभूतेर्भारती ललितलावण्यलास्यविलासेन सहृदय पाठकश्रोतृवृन्दान् आनन्दसन्दोहे निमज्जयतितमामिति। गउडवहो इति प्राकृतमहाकाव्यरचनाकारः वाक्पतिः महाकवेः भवभूतेः कविताकामिनीं समुद्रमिव वर्णयति- "भवभूइ जलहि निग्गय कव्वामयरसकणा इव फुरन्ति।" राजतरङ्गिण्यादि-प्रमाणैर्निश्चीयते यन्महाकविभवभूतिः 700 ईसवीयाब्दस्य निकटवर्तिकाले स्यादिति। अस्य महाकवेः वैदग्ध्यं वेद-शास्त्रपाण्डित्यं चागाधज्ञानभरितमिति समीक्षकैः निश्चीयते। तथाहि - मालतीमाधवे 1/7 महाकविना तत्स्वयमेव प्रतिपादितमिति न तिरोहितं केषामपि।

भवभूतेः नाटकानि :- महाकविना भवभूतिना महावीर-चरितम्, उत्तररामचरितम् मालतीमाधवं चेति रूपकत्रयम् व्यरचि। सीताविवाहादारभ्य राज्याभिषेकपर्यन्तं सप्तस्वङ्केषु निबद्धं महावीरचरितनाटकम्। दशस्वङ्केषु निबद्धमस्ति मालतीमाधवं नाम प्रकरणम्। अत्र मालतीमाधवयोर्विवाहस्य मुख्यकथा वर्तते। भूरिवसुः, देवरातः, नन्दनः, मकरन्दः, कामन्दकी, अघोरघण्टः इति प्रमुखाणि पात्राणि सन्ति अत्र। तत्रैव उत्तरे रामचरिते भवभूतिर्विशिष्यते इत्याभणकमहिम्ना महाकवेः भवभूतेः श्रेष्ठतमनाटकं सप्तस्वङ्केषु निबद्धम् उत्तररामचरितमिति अतीवकरुणारसभरितमस्ति। अत्रत्य तृतीयाङ्कः छायाङ्करूपेण सप्तमाङ्कश्च गर्भनाटकरूपेण प्रसिद्धौ स्तः। आहत्य महाकविः भवभूतिः रससिद्धकविरिति निष्कर्षः निस्सरतितमामिति शम् ।।

इति